दिनाङ्क :- 15.09.2024 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

· प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य रांची नगरात् दृश्यङ्कन-माध्यमेन षड् वन्देभारत-रेल-यानानि प्रारब्धानि। सममेव झारखण्डे षष्ट्युत्तर-षट्-शत-कोटि रूप्यकाधिकानां रेल-परियोजनानाम् अपि लोकार्पणं शिलान्यासं च प्रधानमन्त्रिणा कृतम्।

· दिल्या: मुख्यमन्त्री अरविन्द-केजरीवाल: दिनद्वये मुख्यमन्त्री पदत्यागस्य घोषणाम् अकरोत् ।

· मेरठ-नगरे भवन-ध्वंसे मृतकानां सङ्ख्या समेध्य दश संवृत्ता। ततः पञ्चजनाः सुरक्षिताः निष्कासिताः।

· राष्ट्रपति: उपराष्ट्रपति: प्रधानमन्त्री च जनेभ्य: ओणम् पर्वण: शुभकामना: प्रदत्तवन्त:।

· ऋतुविज्ञान-विभागेन पश्चिमबंगाले गंगाया: तटीयक्षेत्रेषु ओडिशायां झारखण्डे च अद्य प्रचण्ड-वर्षा जलप्लाव: च सम्भाव्यते।

-

<u>प्रधानमन्त्री वन्देभारतम्</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य रांची विमान-पत्तनात् दृश्यङ्कन-माध्यमेन कॉन्फ्रेंस टाटा-नगरं पटनां च समेत्य षड् वन्देभारत-रेल-यानानि हरित-ध्वज-प्रदर्शन-पुरस्सरं प्रारब्धानि। प्रधानमन्त्रिणा झारखण्डे षष्ट्युत्तर-षट्-शत-कोटि रूप्यकाधिकानां रेल-परियोजनानाम् अपि लोकार्पणं शिलान्यासं च कृतम्। पूर्वम् एतानि रेलयानानि जमशेदपुरात् प्रस्थानस्य कार्यक्रमः निर्धारितः आसीत्। परं प्रचुर-वर्षा कारणात् प्रधानमन्त्री जमशेदपुरं नैव प्राप्तवान् तेन रांची नगरात् एव वीडिया कॉन्फ्रेंसिंग इति दृश्याङ्कन-माध्यमेन रेलयानानि प्रारब्धानि। इतः प्राक्

श्रीमोदी अद्य प्रातः जमशेदपुरं गन्तुं रांची-विमानपत्तनम् उपगतम् परं प्रतिकूल-प्रावृट् कारणात् तदीयः उदग्रविमानं नैव प्रस्थितम्। प्रधानमन्त्री दृश्याङ्कन-माध्यमेन जनसभां सम्बोधयन् अवोचत् यत् वन्देभारत-रेल-यानानां सञ्चालनेन झारखण्डं प्रतिवेशि-राज्यानि च समेत्य देशस्य पूर्वीय-क्षेत्रेषु आर्थिक-सांस्कृतिक-गतिविधिसु तीव्रता आगमिष्यति। श्रीमोदिना प्रोक्तं यत् एतेभ्यः रेल-यानेभ्यः पर्यटनोद्योगम् एधिष्यते आजीविकावसरेषु अपि वृद्धिः भविष्यति । अमुना उक्तं यत् केन्द्रं झारखण्डस्य चतुर्दिक् विकासाय प्रतिबद्धम् अस्ति।

**बाइट- फाईल पीएम ऑन इस्टर्न-21 से.**

अत्रान्तरे प्रधानमन्त्री मोदी पीएम ग्रामीणावास-योजनायाः लाभार्थिभ्यः प्रथमं देयमूल्यम् अपि अयच्छत्। अस्यां योजनायां द्वात्रिशत् कोटि-रूप्यकाणि लाभार्थिनां बैंक-लेखासु डिजिटल-माध्यमेन प्रेषितानि । एतदतिरिच्य द्वात्रिंशत् सहस्र गृहाणां स्वीकृति-पत्राणि वितरितानि। श्रीमोदी अवोचत् यत् आगामि-पञ्चवर्षेषु द्विकोटि अतिरिक्त-गृहाणां निर्माणं करिष्यते । तेनोक्त यत् पीएम आवास-योजनया सम्बद्ध-क्षेत्रेषु गतिविधियः एधिष्यन्ते । आजीविकाववसरेषु अपि वृद्धिः भविष्यति।

<u>उपराष्ट्रपतिः महाराष्ट्रम्</u>

उपराष्ट्रपतिना जगदीप-धनखडेन अद्य मुम्बय्याम् एकस्मिन् कार्यक्रमे महाराष्ट्रे चतुस्त्रिंशदुत्तर-चतुःशतम् औद्योगिक-प्रशिक्षण-संस्थानानां व्यावसायिक-प्रशिक्षण-केन्द्रेषु संविधान-मन्दिराणाम् उद्घाटनं कृतम्। अत्रावसरे श्री-धनखडः अवोचत् यत् संविधानं लोकतन्त्रस्य आत्मा वर्तते। संसत् च अस्य संरक्षिका अस्ति। तेनोक्तं यत् संविधानं पठितुम् अवगन्तुम् सम्मानाय च वर्तते। उपराष्ट्रपतिः अध्यर्थियत् राज्यस्य सर्वैः अङ्गैः लोकतान्त्रिक-मूल्यानि संवैधानिक-आदर्शान् च विकसितुम् एकीभूय कार्यचरणम् अवश्यकम्। अत्रावसरे महाराष्ट्रस्य राज्यपालः सी. पी. राधाकृष्णन् अवोचत् यत् भारतीय-संविधानस्य कारणेन अस्माकं देशः जगतः जीवन्तं लोकतन्त्रम् अस्ति।

<u>गृहमन्त्री अभियन्ता दिवसः</u>

केन्द्रीय-गृहमन्त्रिणा अमितशाहेन अद्य अभियन्ता दिवसस्य अवसरे सर्वेभ्यः अभियन्तृभ्यः वर्धापनानि प्रदत्तानि। सामाजिक-सञ्चारपटले श्रीशाहेनोक्तं यत् अभियन्तारो देशस्य विकासे नवाचारे प्रगतौ च मुख्यभूमिकां निभालयन्ति। ते स्वस्य महत्त्वपूर्ण- योगदानेन देशस्य भविष्यं निर्मान्ति। श्री अमितशाहः महान् अभियन्त्रे भारत-रत्न-सम्मानिताय सर.एम.विश्वेश्वरैया इत्यस्मै श्रद्धाञ्जलिं अर्पयन् अवोचत् यत् तदीयं बहुमूल्यं रिक्थं भारतस्य भविष्य-निर्माणे अभियन्तृन् प्रेरयिष्यति।

## अरविन्द केजरीवाल: त्यागपत्रम्

दिल्ल्या: मुख्यमन्त्री अरविन्द-केजरीवाल: घोषणाम् अकरोत् यदसौ दिनद्वये मुख्यमन्त्री पदात् त्यागपत्रं दास्यति। उक्तं च यत् आगामि दिनद्वये भावि-मुख्यमन्त्रिण: निणयं कर्तुम् आप-दलस्य विधायकानाम् उपवेशनम् भविष्यति। दिल्लां दलस्य कार्यकर्तृन् सम्बोधयन् केजरीवाल: अवोचत् यत् यावत् जना: निर्णयं नैव करिष्यन्ति तावत् स: मुख्यमन्त्री पदं नैव स्वीकरिष्यति। सर्वोच्च-न्यायालयेन दिल्ली आबकारीनीति प्रकरणे केजरीवालाय शुक्रवासरे प्रतिभूति: प्रदत्ता। भाजपादलेन प्रोक्तम् यत् अरविन्द केरीवालस्य पदत्याग: तस्य जनेषु स्वीकार्यताया: पदक्षेप: वर्तते।

## ओणम् पर्व

केरले अद्य ओणम् पर्वण: पवित्रदिवस: तिरूओणम आयोज्यते। इदं हि राज्यस्य बृहत्तमं सांस्कृतिकं पर्व विद्यते। यत् हि केरलवासिन: हर्षोल्लासेन परिपालयन्ति। अत्रावसेर राष्ट्रपति: उपराष्ट्रपति: प्रधानमन्त्री च जनेभ्य: शुभकामना: प्रदत्तवन्त:। निजसन्देशे राष्ट्रपति: द्रौपदी मुर्मु: अवोचत् यत् इदं पर्व केरलस्य सांस्कृतिक-रिक्थस्य परम्परायाश्च: आयोजनावासरे परिपाल्यते। उपराष्ट्रपति: जगदीप धनखड़: अवोचत् यत् ओणम पर्व परम्परा माध्यमेन समुदायान् एकस्मिन् सूत्रे बध्नाति। प्रधानमन्त्रिणा नरेन्द्रमोदिना च अस्मिन् अवसरे जनानां जीवने शान्ते: समृद्धे: वैभवस्य च कामना कृता।

## मेरठ-भवनध्वंस:

उत्तर-प्रदेशस्य मेरठ-नगरे भवन-ध्वंसे मृतकानां सङ्ख्या समेध्य दश संवृत्ता। नगरस्य जाकिर कॉलोनी इत्यत्र गतदिने त्रि-तल-भवनं ध्वंसितम्। साहाय्योद्धार-कार्यम् अद्य प्रातः पूर्णम् अभवत्। भग्नावशेषाः पूर्णतया अपसारिताः। ततः पञ्चजनाः सुरक्षिताः निष्कासिताः। मेरठस्य जनपदाधिकारी दीपकमीणा प्रत्यपादयत् यत् घटनायाः समये तस्मिन् भवने पञ्चदश जनाः आसन्। राष्ट्रियापत्-मोचनबलं राज्यापत्-मोचनबलं च समेत्य साहाय्योद्धार-बलानि भग्नावशेषम् अपाकर्तुं नियोजितानि आसनम् ।

<u>महाराष्ट्रे दुर्घटना</u>

महराष्ट्रस्य धुले-जनपदे एकस्याम् पथ- दुर्घाटनायां तिस्त्र: महिला: समेत्य पञ्चजना: मृत्युम् उपगता:। चत्वारो जनाश्च व्रणिता:। इयं दुर्घटना वाहनद्वयस्य परस्परं सङ्घट्टेन अभवत्। व्रणितानाम् उपचार: धुले स्थिते चिकित्सालये विधीयते। घटनाया: अन्वीक्षणं च क्रियते।

<u>ऋतु</u>

भारतीयऋतुविज्ञानविभागेन अद्य पश्चिम बंगाले गङ्गाया: तटीय क्षेत्रेषु, ओडिशा झारखंडयो: च अतिवृष्टे: अनुमानं कृतम्। ऋतुविज्ञानविभागेन छत्तीसगढ़े पूर्वी मध्य प्रदेशे च श्व: यावत् अतिवृष्टे: संभावना प्रकटिता। ऋतुविज्ञानविभागेन अहोरात्रम् यावत् सिक्किम, बिहार, नागालैंड, मणिपुर, मिजोरम, त्रिपुरा, असम, मेघालय चेति राज्येषु अति वृष्टि: अनुमानिता। सममेव दिल्ली एन. सी. आर. क्षेत्रे वात्या सह वर्षाया: संभावना विद्यते।